This question paper contains 8 printed pages]

# HPAS (Main)—2013

## SANSKRIT

## Paper II

*Time : 3 Hours* *Maximum Marks : 150*

1. कादम्बरी में प्रतिपादित बाणभट्ट की काव्य–प्रतिभा का सोदाहरण विवेचन कीजिए।

**अथवा**

महाकवि माघकृत 'प्रकृतिवर्णन' को सोदाहरण प्रतिपादित कीजिए।

2. ईशावास्योपनिषद् में प्रतिपादित आत्मतत्त्व का विवेचन कीजिए।

**अथवा**

अर्थशास्त्र में वर्णित कौटिल्य की 'न्याय व्यवस्था' की समीक्षा कीजिए।

3. अभिज्ञानशाकुन्तलम् के आधार पर कालिदास के नाट्य कौशल की विवेचना कीजिए।

P.T.O.

अथवा

रत्नावली नाटिका के नायक उदयन एवं नायिका रत्नावली की चारित्रिक विशेषताओं का सोदाहरण निरूपण कीजिए।

4. निम्नलिखित में से किन्हीं **तीन** सूक्तियों की संस्कृत में सप्रसंग व्याख्या कीजिए :

(क) कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।

(ख) समाजे विभूषणं मौनमपण्डितानाम्।

(ग) उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी।

(घ) याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।

(ङ) प्रायः सर्वो भवति करुणा वृत्तिरार्द्रान्तरात्मा।

(च) सत्संगतिः कथय किं न करोति पुंसाम्।

5. निम्नलिखित में से किन्हीं **तीन** पद्यों की संस्कृत में सप्रसंग व्याख्या कीजिए :

(क) व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते
छेत्तुं वज्रमणिं शिरीषकुसुमप्रान्तेन सन्नह्यते।
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते
नेतुं वाञ्छति य खलान्पथि सतां सूक्तैः सुधास्यन्दिभिः॥

(ख) अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते।

ततो भूय इव ते तमो य 3 सम्भूत्याँ रताः॥

(ग) मन्दप्रख्यायमानेन रूपेण रुचिरप्रभाम्।

पिनद्धां धूमजालेन शिखामिव विभावसोः॥

(घ) स पर्यगाच्छुक्रमकायमव्रण–

मस्नाविरँ शुद्धमपापविद्धम्।

कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतो–

ऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः॥

6. निम्नलिखित में से किन्हीं **तीन** श्लोकों का हिंदी **अथवा** अंग्रेजी में अनुवाद कीजिए :

(क) पिशङ्गमौञ्जीयुजमर्जुनच्छविं वसानमेणाजिनमञ्जनद्युति।

सुवर्णसूत्राकलिताधराम्बरां विडम्बयन्तं शितिवाससस्तनुम्॥

(ख) मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम्।

प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः॥

(ग) निवारितास्तेन महीतलेऽखिले निरीतिभावं गमितेऽतिवृष्टयः।

न तत्यजुर्नूनमनन्यसंश्रयाः प्रतीपभूपालमृगीदृशां दृशः॥

(घ) व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः।

आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रिता॥

(ङ) तमर्घ्यमर्घ्यादिकमादिपुरुषः सपर्यया साधु स पर्यपूपुजत्।

गृहानुपैतं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः॥

7. निम्नलिखित में से किन्हीं **तीन** की सप्रसंग व्याख्या कीजिए :

(क) लब्धापि खलु दुःखेन परिपाल्यते। दृढगुणपाशसंदाननिष्पन्दीकृतापि नश्यति। उद्दामदर्पभटसहस्रोल्लासितासिलता पंजरविधृताप्यपक्रामति। मदजलदुर्दिनान्धकारगजघनघटापरिपालितापि प्रपलायते। न परिचयं रक्षति। नाभिजनमीक्षते। न रूपमालोकयते। न कुलक्रममनुवर्तते। न शीलं पश्यति। न वैदग्ध्यं गणयति। न श्रुतमाकर्णयति। न धर्ममनुरुध्यते।

(ख) मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं

सन्देशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम्।

खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र

क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्या॥

(ग) वानप्रस्थस्य ब्रह्मचर्यं भूमौ शय्या जटाऽजिनधारणमग्निहोत्राभिषेकौ देवतापित्रतिथिपूजा वन्यश्चाहारः। परिव्राजकस्य संयतेन्द्रियत्वमनारम्भो निष्किञ्चनत्वं सङ्गत्यागो भैक्षमनेकत्रारण्यवासो बाह्याभ्यन्तरं च शौचम्। सर्वेषामहिंसा सत्यं शौचमनसूयाऽऽनृशंस्यं क्षमा च। स्वधर्मः स्वर्गायानन्त्याय च। तस्यातिक्रमे लोकः सङ्करादुच्छिद्येत्।

(घ) प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी

जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम्।

स प्रत्यग्रैः कुटजकुसुमैः कल्पिताघार्य तस्मै

प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार॥

(ङ) मनसा देवताध्यारोपणप्रतारणा सम्भूतसंभावनोपहताश्चान्तः प्रविष्टापरभुजद्वयमिवात्मबाहुयुगलं सम्भावयन्ति। त्वगन्तरिततृतीयलोचनं स्वललाटमाशंकन्ते। दर्शनप्रदानमपि अनुग्रहं गणयन्ति, दृष्टिपातमप्युपकारपक्षे स्थापयन्ति, संभाषणमपि संविभागमध्ये कुर्वन्ति, आज्ञामपि वरप्रदानं मन्यन्ते, स्पर्शमपि पावनमाकलयन्ति।

8. निम्नलिंखित में से किन्हीं **तीन** श्लोकों का हिंदी **अथवा** अंग्रेजी में अनुवाद कीजिए :

(क) इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो

रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः।

अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः

किमस्या न प्रेयो यदि परमसह्यस्तु विरहः॥

(ख) किं त्वं भयेन परिवर्तित सौकुमार्या
नृत्यप्रयोगविशदौ चरणौ क्षिपन्ती।
उद्विग्नचञ्चलकटाक्ष विसृष्ट दृष्टि-
र्व्याधानुसारचकिता हरिणीव यासि॥

(ग) क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपभोगसुलभः लाक्षारसः केनचित्।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै-
र्दत्तान्याभरणानि तत् किसलयोद्भेदप्रतिद्वन्द्विभिः॥

(घ) निवासश्चिन्तायाः परपरिभवो वैरमपरं
जुगुप्सा मित्राणां स्वजनजनविद्वेषकरणम्।
वनं गन्तुं बुद्धिर्भवति च कलत्रात्परिभवो
हृदिस्थः शोकाग्निर्न च दहति संतापयति च॥

(ङ) अर्थो हि कन्या परकीय एव

तामद्य संप्रेष्य परिग्रहीतुः।

जातो ममायं विशदः प्रकामं

प्रत्यर्पितन्यास इवान्तरात्मा॥